उशीरे (वेणारमूल) राजनि०। [१सकले अमरः २पूर्णे च

**समग्र** त्रि० समं सकलं यथा स्यात्तथा गृह्यते ग्रह–ड।

**समङ्गा** स्त्री समज्यतेऽनया सम्+अनृज-करणे घञ् टाप्। मञ्जिष्ठायाम् अमरः। [तुल्यदर्शके तत्त्वज्ञानिनि।

**समचित्त** त्रि० समं सर्वत्र समभावं चित्तं यस्य। सर्वत्र

**समज** न०समजन्त्यत्र सम्+अज–आधारे अप् व्यभावः। १वने मेदि० २समूहे ३पशूनां संघे ४मूर्खवृन्दे च अमरः।

**समज्ञा** स्त्री समस्मिन् सर्वत्र ज्ञायतेऽनया ज्ञा–क। कीर्त्तौ अमरः। [अमरः २कीर्त्तौ च रमानाथः।

**समज्या** स्त्री सम्+अज–क्यप् न वीभावः। १सभायाम्

**समञ्जस** त्रि० सम्यक् अञ्ज औचित्यं यत्र अच् समा०। १उचिते अमरः २युक्ते च। प्रा०स०। ३औचित्ये न०। ४समाधाने त्रिका० ५अभ्यन्ते अमरः।

**समण्ठ** पु० गण्डीरे हारा०। [गुडत्रये राजनि०।

**समतय** न० समं त्रयं यत्र। सममागयुते हरीतकीनागर-

**समदर्शिन्** त्रि० समस्मिन् सर्वत्र ब्रह्मभावेनाऽभिन्नतया पश्यति दृश–णिनि। सर्वत्र समदर्शके तत्त्वज्ञानिनि। "विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि। शुनि चैव श्वपाके च पण्डिताः समदर्शिन" इति गीता।

**समदृष्टि** स्त्री कर्म०। १सर्वत्र तुल्यदर्शने। "दुःखे सुखे च विप्रेन्द्र! या दृष्टिर्वर्त्तते सदा। तथा शत्रौ च मित्रे च समदृष्टिस्तु सा स्मृता" पद्मपु०क्रिया०१६अ०। ६ब०। २समदर्शिनि त्रि०।

**समधिक** त्रि० सम्यक् अधिकः प्रा०। अत्यन्ताधिके अमरः।

**समनियत** त्रि० समेन नियतः। व्यापकत्वे सति व्याप्यत्वयुते गदा०। समव्याप्तादयोऽप्यत्र।

**समन्त** पु०सम्यक् अन्तः, स यत्र वा। १सम्यगन्ते २सीमायाञ्च

**समन्ततस्** अव्य० समन्त+तसिल्। सर्वत्र व्याप्तौ अमरः।

**समन्तदुग्धा** स्त्री समन्ततो दुग्धमस्याः। स्नुहीवृक्षे अमरः।

**समन्तपञ्चक** न० समन्तात् पञ्चकं ह्रदपञ्चकं यत्र। कुरुक्षेत्रस्थे तीर्थभेदे "त्रिःसप्तकृत्वः पृथिवीं कृत्वा निःक्षत्रियां प्रभुः। समन्तपञ्चके पञ्च चकार रौधिरान् ह्रदान्। स तेषु तर्पयामास भृगून् भृगुकुलोद्वहः" भा०व०११७अ०। "तरन्तुकारन्तुकयोर्यदन्तरं रामह्रदानाञ्च मचक्रुकस्य च। एतत् कुरुक्षेत्र समन्तपञ्चकं पितामहस्योत्तरवेदिरुच्यते" भा०व० ८३अ०।

**समन्तभद्र** पु० समन्तात् भद्रमस्य। बुद्धे अमरः।

**समन्तभुज्** पु०समन्तात् भुङ्क्ते भुज–क्विप्। वह्नौ त्रिका०

**समन्तात्** अव्य० समन्त+आति। १समन्ततइत्यर्थे शब्दमा०। २सर्वतव्याप्तौ च।

**समन्वित** त्रि० सम्+अनु+इण–क्त। सङ्गते।

**समपद** न० समं पदं यस्मिन्। धन्विनां समपदनिवेशनपूर्वके "स्थानानि धन्विनां पञ्च" इत्युपक्रम्य "अन्वर्थं स्यात् समपदमि"त्युक्ते अवस्थानभेदे अमरः। २रतिबन्धभेदे पु० "योषित्पादौ हृदि स्थाप्य कराभ्यां पीडयेत् स्तनौ। यथेष्टं ताडयेत् योनिं बन्धः समपदः स्मृतः" रतिमञ्ज०।

**समभिव्याहार** पु० सम्+अभि+वि+आ+हृ-घञ्। १साहित्ये २पूर्वापरीभावे ३शेषशेषिवाचकयोः सहोच्चारणे च मीमांसकाः। [२सहोच्चरिते। ३अव्यवहिते च।

**समभिव्याहृत** त्रि० सम्+अभि+वि+आ+हृ-क्त। १सहिते

**समभिहार** पु० सम्+अभि+हृ-घञ्। १पौनःपुन्ये क्रियासातत्ये २भृशार्थे मेदि० "क्रियासमभिहारेण विराध्यन्तं सहेत कः" माघः।

**समम्** अव्य० सम–अस्। १साहित्ये अमरः। २एकदेत्यर्थे "सममेव समाक्रान्तं द्वयं द्विरदगामिना" रघुः।

**समय** पु० सम+इण–अच्। १काले २शपथे ३आचारे ४सिद्धान्ते ५अङ्गीकारे च अमरः। ६क्रियाकारके ७निर्देशे ८सङ्केते ९भाषायां मेदि० १०सम्पदि ११नियमे १२अवसरे हेमच० १३कालविधाने शब्दच०। १४नियमबन्धे अस्य शब्दस्येदमभिधेयमित्यभिधानाभिधेयनियमबन्धे" वात्स्या० १५शास्त्रे च।

**समया** अव्य० सम+इण–आ। नैकट्ये २मध्ये च अमरः।

**समयाकार** पु० समयस्य सङ्केतस्याकारः। सङ्केते त्रिका०।

**समयाध्युषित** न० समयः अध्युषितो यत्र। सूर्य्यतारारहितकाले "तथा प्रभातसमये नष्टे नक्षत्रमण्डले। रवियावन्न दृश्येत समयाध्युषितञ्च तत्" कर्म०कात्या०। "उदितेऽनुदिते चैव समयाध्युषिते तथा" इति मनुः।

**समयाशुद्धि** स्त्री ६त०। कालाशुद्धौ कालाशुद्धिशब्दे दृश्यम्

**समर** पु० न० सम्+ऋ–आधारे अप्। युद्धे अमरः।

**समरभ** रतिबन्धभेदे "स्वजङ्घाद्वयसंयुक्तं कृत्वा योषित्पदद्वयम्। स्तनौ धृत्वा रमेत् कामी बन्धः समरभः स्मृतः" रतिमञ्ज०।

**समरमूर्द्धन्** पु० ६त०। समराग्रे।

**समर्चन** न० सम्यक् अर्च्चनं प्रा०स०। सम्यक्पूजने।

**समर्ण** त्रि० सम्+अर्द–क्त। सम्यक्पीडिते।